## ९. राजविद्याराजगुह्ययोगः

### श्रीभगवानुवाच

इदं तु ते गुह्यतमं  प्रवक्ष्याम्य् अनसूयवे ।
ज्ञानं विज्ञानसहितं  यज् ज्ञात्वा मोक्ष्यसेऽशुभात् ॥९.१॥
राजविद्या राजगुह्यं  पवित्रम् इदम् उत्तमम् ।
प्रत्यक्षावगमं धर्म्यं  सुसुखं कर्तुम् अव्ययम् ॥९.२॥
अश्रद्दधानाः पुरुषा  धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते  मृत्युसंसारवर्त्मनि ॥९.३॥
मया ततम् इदं सर्वं  जगद् अव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि  न चाहं तेष्व् अवस्थितः ॥९.४॥
न च मत्स्थानि भूतानि  पश्य मे योगम् ऐश्वरम् ।
भूतभृन् न च भूतस्थो  ममात्मा भूतभावनः ॥९.५॥
यथाकाशस्थितो नित्यं  वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि  मत्स्थानीत्य् उपधारय ॥९.६॥
सर्वभूतानि कौन्तेय  प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस् तानि  कल्पादौ विसृजाम्य् अहम् ॥९.७॥
प्रकृतिं स्वाम् अवष्टभ्य  विसृजामि पुनः पुनः ।
भूतग्रामम् इमं कृत्स्नम्  अवशं प्रकृतेर् वशात् ॥९.८॥
न च मां तानि कर्माणि  निबध्नन्ति धनंजय ।
उदासीनवद् आसीनम्  असक्तं तेषु कर्मसु ॥९.९॥
मयाध्यक्षेण प्रकृतिः  सूयते सचराचरम् ।
हेतुनानेन कौन्तेय  जगद् विपरिवर्तते ॥९.१०॥
अवजानन्ति मां मूढा  मानुषीं तनुम् आश्रितम् ।
परं भावम् अजानन्तो  मम भूतमहेश्वरम् ॥९.११॥
मोघाशा मोघकर्माणो  मोघज्ञाना विचेतसः ।
राक्षसीम् आसुरीं चैव  प्रकृतिं मोहिनीं श्रिताः ॥९.१२॥
महात्मानस् तु मां पार्थ  दैवीं प्रकृतिम् आश्रिताः ।
भजन्त्य् अनन्यमनसो  ज्ञात्वा भूतादिम् अव्ययम् ॥९.१३॥
सततं कीर्तयन्तो मां  यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या  नित्ययुक्ता उपासते ॥९.१४॥
ज्ञानयज्ञेन चाप्य् अन्ये  यजन्तो माम् उपासते ।
एकत्वेन पृथक्त्वेन  बहुधा विश्वतोमुखम् ॥९.१५॥
अहं क्रतुर् अहं यज्ञः  स्वधाहम् अहम् औषधम् ।
मन्त्रोऽहम् अहम् एवाज्यम्  अहम् अग्निर् अहं हुतम् ॥९.१६॥
पिताहम् अस्य जगतो  माता धाता पितामहः ।
वेद्यं पवित्रम् ओंकार  ऋक् साम यजुर् एव च ॥९.१७॥
गतिर् भर्ता प्रभुः साक्षी  निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं  निधानं बीजम् अव्ययम् ॥९.१८॥
तपाम्य् अहम् अहं वर्षं  निगृह्णाम्य् उत्सृजामि च ।
अमृतं चैव मृत्युश्च  सद् असच् चाहम् अर्जुन ॥९.१९॥
त्रैविद्या मां सोमपाः पूतपापा
यज्ञैर् इष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यम् आसाद्य सुरेन्द्रलोकम्
अश्नन्ति दिव्यान् दिवि देवभोगान् ॥९.२०॥
ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्मम् अनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥९.२१॥
अनन्याश् चिन्तयन्तो मां  ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां  योगक्षेमं वहाम्य् अहम् ॥९.२२॥
येऽप्य् अन्यदेवता भक्ता  यजन्ते श्रद्धयान्विताः ।
तेऽपि माम् एव कौन्तेय  यजन्त्य् अविधिपूर्वकम् ॥९.२३॥
अहं हि सर्वयज्ञानां  भोक्ता च प्रभुर् एव च ।
न तु माम् अभिजानन्ति  तत्त्वेनातश् च्यवन्ति ते ॥९.२४॥
यान्ति देवव्रता देवान्  पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या  यान्ति मद्याजिनोऽपि माम् ॥९.२५॥
पत्रं पुष्पं फलं तोयं  यो मे भक्त्या प्रयच्छति ।
तद् अहं भक्त्युपहृतम्  अश्नामि प्रयतात्मनः ॥९.२६॥
यत् करोषि यद् अश्नासि  यज् जुहोषि ददासि यत् ।
यत् तपस्यसि कौन्तेय  तत् कुरुष्व मदर्पणम् ॥९.२७॥
शुभाशुभफलैर् एवं  मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा  विमुक्तो माम् उपैष्यसि ॥९.२८॥
समोऽहं सर्वभूतेषु  न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या  मयि ते तेषु चाप्य् अहम् ॥९.२९॥
अपि चेत् सुदुराचारो  भजते माम् अनन्यभाक् ।
साधुर् एव स मन्तव्यः  सम्यग् व्यवसितो हि सः ॥९.३०॥
क्षिप्रं भवति धर्मात्मा  शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि  न मे भक्तः प्रणश्यति ॥९.३१॥
मां हि पार्थ व्यपाश्रित्य  येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास् तथा शूद्रास्  तेऽपि यान्ति परां गतिम् ॥९.३२॥
किं पुनर् ब्राह्मणाः पुण्या  भक्ता राजर्षयस् तथा ।
अनित्यम् असुखं लोकम्  इमं प्राप्य भजस्व माम् ॥९.३३॥
मन्मना भव मद्भक्तो  मद्याजी मां नमस्कुरु ।
माम् एवैष्यसि युक्त्वैवम्  आत्मानं मत्परायणः ॥९.३४॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥